**संस्कृत वार्ता:**

**दिनाङ्क : 02/03/2026**

**सायम्- 06:20**

**<u>आदौ मुख्यवार्ता:</u>**

- प्रधानमन्त्रिणा नरेन्द्रमोदिना, कनाडादेशस्य प्रधानमन्त्रिणा मार्क कार्नी इत्यनेन च सह प्रतिनिधिस्तरीय-वार्ता कृता। भारत-कनाडा-देशयोः मध्ये विभिन्नक्षेत्रेषु त्रिषु सन्धिपत्रेषु हस्ताक्षराणि अपि जातानि।
- प्रधानमन्त्रिणा उक्तम् यत् भारतं संवादस्य कूटनीतेः च माध्यमेन सर्वेषां विवादानां समाधानस्य समर्थनं करोति ।
- पश्चिम-एशियायां वर्धमान-स्थित्या कारणात् केन्द्रेण राज्यानां कृते परामर्श: प्रकाशितः यत् सावधानाः भवेयुः।
- पश्चिम-एशियायाः वर्तमानस्थित्यानुसारं एयर-इण्डिया-संस्थया युनाईटेड अरब अमिरात्, साऊदी अरब, इस्रेल, कतर देशान् प्रति सर्वा: विमानसेवाः अद्य दिवसान्तं यावत् स्थगिता:।
- अपि च,
- अशोधिततैलस्य मूल्यं सप्तप्रतिशतात् अधिकम् औन्नत्यं अवाप्नोत्। पश्चिम-एशियायां तीव्र-तनावस्य कारणात् अद्य एशिया-प्रशान्त-स्टाक-आपणं तीव्ररूपेण पतितम्।

-------------

**<u>भारत-कनाडा-सन्धयः</u>**

अद्य भारत-कनाडा-देशयोः मध्ये विभिन्नक्षेत्रेषु त्रिषु सन्धिपत्रेषु हस्ताक्षराणि जातानि। अद्य नवदिल्ल्याः हैदराबाद-हाऊस-इत्यत्र प्रधानमन्त्रिणा नरेन्द्रमोदिना, कनाडादेशस्य प्रधानमन्त्रिणा मार्क कार्नी इत्यनेन च सह प्रतिनिधिस्तरीय-वार्ता कृता। वार्तालापस्य समये, उभौ भारत-कनाडा-सामरिकसहभागित्वस्य विविधक्षेत्रेषु अद्यपर्यन्तं प्राप्तायाः प्रगतिं समीक्षितवन्तौ। व्यापार-निवेशः, ऊर्जा, कृषिः, शिक्षा, अनुसंधान-नवान्वेषणम्, जनसम्पर्केत्यादिषु प्रमुखक्षेत्रेषु वर्तमानसहयोगस्य विषये

अपि तौ अवलोकनं कृतवन्तौ। उभयोः मध्ये क्षेत्रीयस्य वैश्विकस्य च विकासस्य विषये अपि विचारानां आदानप्रदानम् अभवत्। कनाडादेशस्य समकक्षीयेन मार्क कार्नी इत्यनेन सह संयुक्तं वार्ताहर सम्मेलनं सम्बोधयन् श्रीमोदी अवदत् यत् पश्चिम-एशियायाः वर्तमानस्थितिः अतीव चिन्तास्पदं वर्तते। सः अवदत् यत्, भारतं संवादस्य कूटनीतेः च माध्यमेन सर्वेषां विवादानां समाधानस्य समर्थनं करोति।

**बाइट-पीएम ऑन वेस्ट एशिया कॉन्फ्लिक्ट - 21**

त्रिंशोत्तर द्विसहस्रतमवर्षपर्यन्तं द्वैपाक्षिकव्यापारं पञ्चाशत् बिलियन्-डालर्-पर्यन्तं विस्तारयितुं भारत-कनाडा-देशयोः महत्वाकांक्षी लक्ष्यः निर्धारितः अस्ति इति श्रीमोदिना उक्तम्।

**बाइट-पीएम ऑन इंडिया कनाडा पार्टनरशिप - 27**

प्रधानमन्त्री श्रीमोदी अवदत् यत् अद्य उभौ पक्षौ भारत-कनाडा-रक्षा-संवादस्य स्थापनार्थं निर्णयं कृतवन्तौ। कनाडा-देशस्य प्रधानमन्त्री मार्क कार्नी अवदत् यत् कनाडा-देशः भारतेन सह सम्बन्धं नवीकरोति, सम्बन्धं विस्तारयति च। सः अवदत् यत्, उभौ देशौ वाणिज्ये, रक्षायां, ऊर्जायां च दृढं आधारं निर्मीयन्ते। अवधेयं यत् कनाडादेशस्य प्रधानमन्त्री गतमासस्य सप्तविंशति दिनाङ्कात् आरभ्य चतुर्दिवसीया भारतयात्रायाम् अस्ति। प्रधानमन्त्री कार्नी, यः गतवर्षे मार्चमासे कार्यभारं स्वीकृतवान्, सः भारतस्य प्रथमायां पूर्ण-द्वैपाक्षिक-यात्रायाम् अस्ति।

**<u>प्रधानमन्त्री- पश्चिम-एशिया</u>**

प्रधानमन्त्रिणा नरेन्द्रमोदिना पश्चिम-एशियायाः स्थितिं समीक्षितुं गत सायं सुरक्षा-विषयक-मन्त्रि-सभासमित्याः सी. सी. एस्. सभायाः अध्यक्षता कृता। गतमासस्य अष्टाविंशति दिनाङ्के ईरान्-देशे वायु-आक्रमणानां विषये, तदनन्तरम् अनेकेषु गल्फ-देशेषु कृतानां आक्रमणानां विषये च समित्या सूचितम्। समित्या अस्मिन् क्षेत्रे विशालस्य भारतीय-प्रवासी-समुदायस्य सुरक्षायाः विषये गम्भीरं चिन्तां प्रकटितम्। पश्चिम-एशियायां वर्धमान-स्थित्या कारणात् केन्द्रेण राज्यानां कृते परामर्शः प्रकाशितः यत् सावधानाः भवेयुः।

**राष्ट्रपति-महिला-योजना:**

अद्य राष्ट्रपतिः द्रौपदी मुर्मुः वर्या देहलीनगरस्य महिलानां कृते चतस्रः योजनाः समर्पितवती। एतासु योजनासु लखपति बिटिया योजना, सहेली पिङ्क् स्मार्ट कार्ड, मेरी पूञ्जी मेरा अधिकार, निःशुल्कः एल्. पि. जि. वातीन्धन सिलिण्डर् योजना च अन्तर्भवन्ति। अस्मिन् अवसरे राष्ट्रपतिः मुर्मुः अवदत् यत् महिलाः समाजस्य अपरिहार्याः स्तम्भाः सन्ति इति।

-

**ईरान-इस्रायेल अमेरिका**

पश्चिमएशियायां द्वंद्वः तीव्रतरः अभवत् यतोहि ईरान-इस्रायेल्- अमेरिकादेशानां सैन्यदलानि मिलित्वा क्षिपणि-ड्रोण्-आक्रमणानां नूतनः तरङ्गः प्रारब्धवन्तः। ईरानेन तस्य समर्थक-सैन्यदलैः च इस्रायेल्-खाति देशयोः उपरि च क्षिपणि-प्रहारं कृतवन्तः, तत्रैव इस्रायेल्अमेरिकादेशौ च ईरानदेशस्य लक्ष्यीकृतानि क्षेत्राणि आक्रान्तवन्तः। ब्रिटेन-फ्रान्स्-जर्मनी-देशाः च उक्तवन्तः यत् ते इरान् देशस्य आक्रमणानां सम्मुखीकरणाय अमेरिकायाः सहायता कर्तुं सज्जाः सन्ति, तथा च खाति-राज्यानाम् एकः समूहः अवदत् यत् तेषां पार्श्वे ईरानस्य-आक्रमणानां प्रतिकारस्य अधिकारः अस्ति इति। यू. के.-देशस्य प्रधानमन्त्री कीर् स्टार्मरः इरानी-क्षिपणि-स्थलेषु रक्षात्मक-आक्रमणार्थं ब्रिटिश-सैन्याधारस्य उपयोगाय अमेरिकादेशस्य प्रार्थनां स्वीकृतवान्। अत्रान्तरे, कुवैट्-देशस्य रक्षामन्त्रालयेन ख्यापितं यत् अनेकानि अमेरिकीय-युद्धविमानानि विनष्टानि, परन्तु तेषां कर्मचारिणः जीविताः सन्ति। अद्य इस्रायेल्-वायुसेनायाः सूचना आसीत् यत् इरान्-देशः इस्रायेल्-प्रदेशं लक्ष्यीकृत्य क्षिपण्याः प्रक्षेपणम् अकरोत् इति।

-

**एयर-इण्डिया-परामर्शः**

पश्चिम-एशियायाः वर्तमानस्थित्यानुसारं एयर-इण्डिया-संस्थया यात्रा-परामर्शः प्रसारिताऽस्ति। युनाईटेड अरब अमिरात् (यु. ए. ई.), साऊदी अरब, इस्रेल, कतर

देशान् सर्वा: विमानसेवाः अद्य दिवसान्तपर्यन्तं स्थगिता:। एतदतिरिच्य अद्य यूरोप्-देशं प्रति निर्धारितानि कानिचन् विमानयानानि अपि निरस्तानि सन्ति।

**<u>उत्तरप्रदेश-होलिका-दहन</u>**

उत्तरप्रदेशे अद्य होलिका-दहनस्य सज्जता द्रुतगत्या प्रचलिता अस्ति। मुख्यमन्त्री योगी आदित्यनाथः होली-पर्वणः शुभकामनाः, नागरिकैः शान्त्या सौहार्देन च उत्सवम् आचरितुं उक्तवान्, सहैव उत्सवे स्थानीय-उत्पादानाम् उपयोगाय अपि प्रोत्साहितवान्। मुख्यमंत्रिणा स्वस्य सन्देशे सर्वेषु मण्डलेषु सुरक्षाव्यवस्थाः सुदृढाः सन्ति इति आश्वासितवान् तथा च प्रशासनस्य सहयोगाय जनान् प्रार्थितवान्। श्वः चन्द्रग्रहणेन बुधवासरे रङ्गैः उत्सवः भविष्यति।

**<u>ऋतु-विभागेन</u>**

भारत-ऋतु-विभागेन संभावना प्रकटिता यत् आगामिषु पञ्चदिनेषु वायव्यभारतस्य भूतल-प्रदेशेषु अधिकतम-तापमानं क्रमेण त्रि-पञ्च-डिग्री-सेल्सियस् यावत् संवर्द्धिस्यति। आगामिदिन-द्वयोः देशस्य मध्यभागेषु अधिकतमं तापमानं क्रमेण द्वितः चत्वारि डिग्री सेल्सियस् यावत् संवर्धनस्य आशङ्का विभागेन प्रकटिता अस्ति। अस्मिन् मासे चत्वारि तः षड् दिनाङ्कयोः मध्ये गुजरात्, कोङ्कण्, गोवा इत्येतेषु प्रदेशेषु उष्णं आर्द्रं च वातावरणं भविष्यति इति विभागेन उक्तम्।

**<u>तैल-मूल्य-वृद्धिः</u>**

अशोधिततैलस्य मूल्यं सप्तप्रतिशतात् अधिकम् औन्नत्यं अवाप्नोत्। पश्चिम-एशियायां तीव्र-तनावस्य कारणात् अद्य एशिया-प्रशान्त-स्टाक-आपणं तीव्ररूपेण पतितम्।

**।। इति वार्ता: ।।**